# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा- आचार्यः | प्रश्नपत्रम् – २ | गुणाः – ७० |
| विषयः – फलितज्योतिषम् | सत्रम्- ०४ | समयः- ११.३० तः २.३० |
| दिनाङ्कः – २७-०३-२०२० | सन्दर्भग्रन्थः – हस्तसंजीवनम् , ज्योतिषशास्त्रस्येतिहासः । | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

प्रश्न-१ अधोलिखितयोः कस्यचिद् एकस्य व्याख्यां कुरुत । ( ०५ )

( क ) नास्ति हस्तात्परं ज्ञानं त्रैलोक्ये सचराचरे ।
यद्ब्राह्मं यं पुस्तकं हस्ते धृतबोधाय जन्मिनाम् ॥

( ख ) पितृरेखा भवेद्गंगा मातृरेखा सरस्वती ।
आयु रेखात्र यमुना तत्संगस्तीर्थमक्षयम् ॥

प्रश्न-२ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं लिखत । ( १० )

( क ) हस्तरेखामहत्त्वम् ।

( ख ) हस्ते न्यासविधिः

### द्वितीयान्वितिः (Unit 2)

प्रश्न-३ अधोलिखितयोः कस्यचिद् एकस्य व्याख्यां कुरुत । ( ०५ )

( क ) गर्भप्रश्ने करस्पर्शे समाङ्गुल्या तु बालिका ।
पुत्रः स्याद्विषमाङ्गुल्यां तलस्पर्शे नपुंसकम् ॥

( ख ) शोभने हस्तनक्षत्रे ग्रहे सौम्ये शुभे दिने ।
पूर्वाह्ने मंगलैर्युक्ते परीक्षेत विचक्षणः ॥

प्रश्न-४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं लिखत । ( १० )

( क ) हस्तस्पर्शेन नष्टवस्तुज्ञानम् ।

( ख ) आयुनिर्णयः ।

### तृतीयान्वितिः (Unit 3)

प्रश्न- ५ अधोलिखितयोः कस्यचिद् एकस्य व्याख्यां कुरुत । ( ०५ )

( क ) यस्याः करतले रेखा मयूरं धत्रमीक्ष्यते ।
राजपत्नित्वमाप्नोति पुत्रैश्च सह वर्धते ॥

( ख ) द्वादशाब्दानि रेखाणां न तादृक् स्पष्टता भवेत् ।
तत्परं त्रीणि वर्षाणि वामहस्तेक्षणं शिशोः ॥

प्रश्न-६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं लिखत । (१०)

(क) प्रशस्तनखलक्षणम् ।

(ख) दाम्पत्यसुखविचारः ।

## चतुर्थान्वितिः (Unit 4)

प्रश्न- ७ अधोलिखितयोः कस्यचिद् एकस्य परिचयो देयः । (०५)

(क) बृहत्संहिता , वराहमिहिरः वा ।

(ख) पराशरहोराशास्त्रम् ।

प्रश्न-८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं लिखत । (१०)

(क) ज्योतिषशास्त्रस्य महत्त्वम् ।

(ख) ज्योतिषशास्त्रस्य परिचयः ।

## अन्वितयः १-४ (Unit 1-4)

प्रश्न-९ अधोलिखितेषु केषाञ्चिद् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । (१०)

१ हस्तसंजीवनस्य रचनाकारः कोऽस्ति ?

२ ब्रह्मतीर्थः कुत्र भवति ?

३ कायतीर्थः कस्यामङ्गुल्यां भवति ?

४ 'ज्येष्ठा' इति कस्याः अङ्गुल्याः अपरं नाम अस्ति ?

५ 'अन्त्या' इति कस्याः अङ्गुल्याः अपरं नाम अस्ति ?

६ अङ्गुल्यां कति पर्वाणि भवन्ति ?

७ नन्दातिथेः स्थापनं कस्यामङ्गुल्यां भवति ?

८ कनिष्ठाङ्गुल्याः ब्राह्मणादिषु कः वर्णः अस्ति ?

९ हस्ते अश्विनीनक्षत्रस्य स्थानं कुत्र भवति ?

१० हस्ते शनिपर्वतः कुत्र भवति ?

११ बृहत्संहिताग्रन्थस्य रचनाकारः कः ?

१२ ज्योतिषशास्त्रस्य कति स्कन्धाः सन्ति ?

१३ ज्योतिषशास्त्रस्य कति प्रवर्तकाः सन्ति ?

१४ वेदाङ्गज्योतिषस्य रचानाकारः कोऽस्ति ?

१५ जातकपारिजातस्य रचनाकारः कोऽस्ति ?

*************************